H1H7I9

7 सङ्ख्या



सुरेशः : अहो रमेश ! कुत्र गच्छति ?

रमेशः : आपणं गच्छामि ।

सुरेशः : अहम् अपि आगच्छामि ।

रमेशः : भवान् किं क्रेतुम् इच्छति ।

सुरेशः : अहं फलानि क्रेतुम् इच्छामि ।

रमेशः : पश्यत, तत्रैव फलविपणी अस्ति । चलतु ।

सुरेशः : पञ्चम्यां विपण्यां पक्वानि फलानि सन्ति ।

रमेशः : भद्र, आम्रफलानां कियत् मूल्यम् ?

फलविक्रेता : पञ्चाशत्रूप्यकाणां दश फलानि ।

रमेशः : द्वादशकदलीफलानाम् ?

फलविक्रेता : षोडशरुप्यकाणि ।

रमेशः : चतुर्णां नारङ्गफलानाम् ?

फलविक्रेता : विंशतिरूप्यकाणि ।

सुरेशः : तर्हि मह्यं त्रिंशत् कदलीफलानि ददातु ।

रमेशः : मह्यं द्वादश नारङ्गफलानि ददातु ।

सुरेशः : कियत् मूल्यम् ?

फलविक्रेता : कदलीफलानां चत्वारिंशत् ,नारङ्गफलानां च षष्टिः ।

रमेशः : शतरूप्यकाणि स्वीकरोतु ।

फलविक्रेता : भवतु ।

टिप्पणी

कदलीफलम् કેળું **नारङ्गफलम्** નારંગી **आम्रफलम्** કેરી **आपणम्** દુકાન **क्रेतुम्** ખરીદવા માટે **विपणी** દુકાન **पक्वानि** પાકેલાં **भद्र** મહાશય **कियत्** કેટલું **भवतु** ભલે.

स्वाध्यायः

K8W2K1

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

आपणम्, क्रेतुम्, तत्रैव, विपण्याम्, पञ्चाशत्, रूप्यकाणाम्, चतुर्णाम्, नारङ्गफलानाम्, मह्यम्, शतरूप्यकाणि ।

2. આપેલા પ્રશ્નોના જવાબ સંસ્કૃત ભાષામાં લખો :

(1) द्वादश कदलीफलानां कियत् मूल्यम् ?

(2) कति नारङ्गफलानां मूल्यं विंशति रूप्यकाणि ?

(3) कः फलविक्रेत्रे शतरूप्यकाणि ददाति ?

(4) रमेशः कति नारङ्गफलानि क्रीणाति ?

(5) त्रिंशत् कदलीफलानां कियत् मूल्यम् ?

3. જોડકાં જોડો :

	अ	ब
(1)	नवनवतिः	९६
(2)	षट्सप्ततिः	४९
(3)	नवचत्वारिंशत्	९९
(4)	एकाशीतिः	७६
(5)	षण्णवतिः	८१

(ક) ખાલી જગ્યા પૂરો :

(1) _____ कदलीफलानां चतुस्त्रिंशत् रुप्यकाणि ।

(2) पञ्च दाडिमानां मूल्यं _____ रूप्यकाणि ।

(3) दश आम्रफलानां मूल्यं _____ रूप्यकाणि ।

(ખ) પ્રશ્ન 4માં આપેલ કોષ્ટકના આધારે આપેલાં વાક્યો ખરાં છે કે ખોટાં તે કહો :

(1) दश सेवफलानां मूल्यं अष्टनवति रूप्यकाणि । ( )

(2) उपनेत्रस्य मूल्यं पञ्चाशत् रूप्यकाणि । ( )

(3) युतकस्य मूल्यं पञ्चषष्टिः रूप्यकाणि । ( )

4. કોષ્ટકના આધારે તેની નીચે આપેલા પ્રશ્નોના જવાબ લખો :

फलानि	मूल्यम्	वस्तूनि	मूल्यम्
द्वादश कदलीफलानि	३५	उपनेत्रम्	७५
पञ्च दाडिमफलानि	४०	कर्तरी	४६
दश सेवफलानि	९८	तालम्	६०
द्राक्षाफलानि	४६	घटः	८०
चतुर्विंशतिः आम्रफलानि	१००	युतकम्	६५

प्रश्नो :

(1) कस्य मूल्यं पञ्चसप्तति रूप्यकाणि अस्ति ?

(2) पञ्च दाडिमस्य मूल्यं कति रूप्यकाणि अस्ति ?

(3) तालस्य मूल्यं कति रूप्यकाणि अस्ति ?

(4) षट्चत्वारिंशत् रूप्यकाणि कस्य कस्य मूल्यं अस्ति ?

5. શબ્દોમાં અને અંકમાં લખો :

(1) 68 : _____

(2) 74 : _____

(3) 100 : _____

(4) 88 : _____

(5) 57 : _____

6. કોષ્ટક પૂરું કરો :

	द्विषष्टिः	૮૨	
૮૭			त्रिपञ्चाशत्
	द्विनवतिः	૮૩	
૫૬			पञ्चचत्वारिंशत्
	सप्तत्रिंशत्	૮૮	

પ્રવૃત્તિ

(1) ૧થી ૧૦૦ સુધીની સંખ્યાનાં અંકકાર્ડ તથા શબ્દકાર્ડ બનાવો.

(2) कति અને कियत् શબ્દોનો ઉપયોગ કરી પાંચ પ્રશ્નો બનાવો.

ઉદાહરણ : (1) पाण्डवाः कति सन्ति ? (2) घटे कियत् जलम् अस्ति ?

किं भवान् जानाति ?

भारतदेशे द्वादश ज्योतिर्लिङ्गानि सन्ति ।

१.	एकम्	२१.	एकविंशतिः	४१.	एकचत्वारिंशत्	६१.	एकषष्टिः	८१.	एकाशीतिः
२.	द्वे	२२.	द्वाविंशतिः	४२.	द्विचत्वारिंशत्	६२.	द्विषष्टिः	८२.	द्वाशीतिः
३.	त्रीणि	२३.	त्रयोविंशतिः	४३.	त्रिचत्वारिंशत्	६३.	त्रिषष्टिः	८३.	त्र्यशीतिः
४.	चत्वारि	२४.	चतुर्विंशतिः	४४.	चतुश्चत्वारिंशत्	६४.	चतुःषष्टिः	८४.	चतुरशीतिः
५.	पञ्च	२५.	पञ्चविंशतिः	४५.	पञ्चचत्वारिंशत्	६५.	पञ्चषष्टिः	८५.	पञ्चाशीतिः
६.	षट्	२६.	षड्विंशतिः	४६.	षट्चत्वारिंशत्	६६.	षट्षष्टिः	८६.	षडशीतिः
७.	सप्त	२७.	सप्तविंशतिः	४७.	सप्तचत्वारिंशत्	६७.	सप्तषष्टिः	८७.	सप्ताशीतिः
८.	अष्ट	२८.	अष्टाविंशतिः	४८.	अष्टचत्वारिंशत्	६८.	अष्टषष्टिः	८८.	अष्टाशीतिः
९.	नव	२९.	नवविंशतिः	४९.	नवचत्वारिंशत्	६९.	नवषष्टिः	८९.	नवाशीतिः
१०.	दश	३०.	त्रिंशत्	५०.	पञ्चाशत्	७०.	सप्ततिः	९०.	नवतिः
११.	एकादश	३१.	एकत्रिंशत्	५१.	एकपञ्चाशत्	७१.	एकसप्ततिः	९१.	एकनवतिः
१२.	द्वादश	३२.	द्वात्रिंशत्	५२.	द्विपञ्चाशत्	७२.	द्विसप्ततिः	९२.	द्विनवतिः
१३.	त्रयोदश	३३.	त्रयस्त्रिंशत्	५३.	त्रिपञ्चाशत्	७३.	त्रिसप्ततिः	९३.	त्रिनवतिः
१४.	चतुर्दश	३४.	चतुस्त्रिंशत्	५४.	चतुष्पञ्चाशत्	७४.	चतुस्सप्ततिः	९४.	चतुर्णवतिः
१५.	पञ्चदश	३५.	पञ्चत्रिंशत्	५५.	पञ्चपञ्चाशत्	७५.	पञ्चसप्ततिः	९५.	पञ्चनवतिः
१६.	षोडश	३६.	षट्त्रिंशत्	५६.	षट्पञ्चाशत्	७६.	षट्सप्ततिः	९६.	षण्णवतिः
१७.	सप्तदश	३७.	सप्तत्रिंशत्	५७.	सप्तपञ्चाशत्	७७.	सप्तसप्ततिः	९७.	सप्तनवतिः
१८.	अष्टादश	३८.	अष्टात्रिंशत्	५८.	अष्टपञ्चाशत्	७८.	अष्टसप्ततिः	९८.	अष्टनवतिः
१९.	नवदश	३९.	नवत्रिंशत्	५९.	नवपञ्चाशत्	७९.	नवसप्ततिः	९९.	नवनवतिः
२०.	विंशतिः	४०.	चत्वारिंशत्	६०.	षष्टिः	८०.	अशीतिः	१००.	शतम्

''हसामः''

''अद्य पाठः अस्ति इत्यस्य भविष्यत्कालरूपं किम् ?''

''श्वः विरामः भविष्यति इति ।''

''कथम् एतत् ?''

''यतः श्वः रविवासरः''